International Journal of Sanskrit Research 2025; 11(5): 323-327

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2025; 11(5): 323-327
© 2025 IJSR
www.anantaajournal.com
Received: 18-08-2025
Accepted: 21-09-2025

**अनिमेष-हालदारः**
शोधछात्रः, राष्ट्रिय संस्कृत विश्वविद्यालयः तिरुपति, आंध्र प्रदेश, भारत

**Corresponding Author:**
**अनिमेष-हालदारः**
शोधछात्रः, राष्ट्रिय संस्कृत विश्वविद्यालयः तिरुपति, आंध्र प्रदेश, भारत

# स्वप्नवासवदत्ते मनोवृत्तिविवेचनात्मकमध्ययनम्

## अनिमेष-हालदारः

**प्रस्तावना**

साहित्यं नाम शास्त्रम् अनधिगतार्थज्ञापकम् अधिगतार्थस्य च सदृष्टान्तं प्रतिपादकम्। सहितं रसेन युक्तं, तस्य भावः साहित्यमिति, हितेन निरतिशयप्रेमास्पदेन रसेन सहितं तस्य भावः साहित्यमिति च व्युत्पत्त्या साहित्यस्य रसोपजीवित्वं ख्यापितम्। किन्तु हितम् अपिहितम् आवृतं तत्सहितं, तस्य भावः साहित्यमिति व्युत्पत्त्या आवृतविषयस्य समक्षप्रकाशमेव साहित्यस्य परमप्रयोजनमिति सोत्कण्ठमुद्घोष्यते। अपि च, काव्यविदामाह्लादकारिणि बन्धे शब्दार्थौ विशेषरूपेण सहितौ सन्तौ काव्यं जनयतः। युक्तमुक्तं वक्तोक्तिकारेण राजानककुन्तकाचार्येण-

‘शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि॥’[1] इति।

शब्दार्थयोः विशेषावस्थानादेव काव्यं लोकवृत्तिज्ञापकं, कान्तासम्मितयोपदेशदायकं भवति। वस्तुतः काव्यप्रकाशे उक्तेषु काव्यप्रयोजनेषु ‘व्यवहारविदे’ इति पदं व्याख्यायता मम्मटेनोक्तं ‘राजादिगतोचिताचरपरिज्ञानम्’ इति। अत्र राज्ञां राजसम्बन्धिनां, राजेतराणाञ्च मनुष्याणाम् आचारज्ञानं काव्यादेव भवति। आचारपदम् आचरणवाचि। मनुष्याणाम् आचरणस्य द्वौ भेदौ सम्भवतः- शारीरं मनोजं च। उभयविधमेव आचरणं काव्याद् आयासमनपेक्षैव ज्ञायते।
तत्र शारीरमाचरणं मनोजाचरणनिर्भरं भवति। मनोजाचरणञ्च मनोवृत्तिमेव अनुसरति। किन्तु काव्यं हि रत्नाकरम्। रत्नाकरेऽस्मिन् निमज्जनं मया इहजन्मनि असम्भवमेव। तस्मात् दृश्यकाव्येषु अन्यतमे स्वप्नवासवदत्तमिति रूपके मनोवृत्तिमाश्रित्य इदं पत्रं रचितुं चेष्टे।

**मूलम्-**

यौगन्धरायणस्य प्रश्नं परिप्रेक्ष्य तपोवनस्याश्रमे उपस्थितो ब्रह्मचारी राज्ञ उदयनस्य शोकार्तावस्थां वर्णयन् वदति-

‘‘नैवेदानीं तादृशाश्चक्रवाका नैवाप्यन्ये स्त्रीविशेषैर्वियुक्ताः।
धन्या सा स्त्री यां तथा वेत्ति भर्ता भर्तृस्नेहात् सा हि दग्धाप्यदग्धा॥’’१/१३ इति।

उक्तेरस्या वरवध्वोः निविडगभीरप्रेमप्रकाशः परिलक्ष्यते। अपि चेयं वियोगव्यथा अत्यन्तं पीडादायिनीत्यपि परिस्फुटा। प्रियतमा वासवदत्ता दग्धाप्यत्यधिकस्नेहवशाद् राज्ञ उदयनस्य मनोमन्दिरे सर्वदैव विराजमाना। न हि प्रियजनस्य वियोगव्यथा मनसः अनायासेन दूरीभवति। सा च पौनःपुन्येन तन्मनसि जागरिता भवति वेदनां चोत्पादयति।
कोऽपि शोककातरं राजानम् उदयनं प्रकृतिस्थं करोति न वेति वर्णयन् ब्रह्मचारी वदति-

‘‘अनाहारे तुल्यः प्रततरुदितक्षामवदनः
शरीरे संस्कारं नृपतिसमदुःखं परिवहन्।
दिवा वा रात्रौ वा परिचरति यत्नैर्नरपतिं
नृपः प्राणान् सद्यस्त्यजति यदि तस्याप्युपरमः॥१/१४ इति।

[1]वक्रोक्तिजीवितम् १/७

रुमण्वान् नामैकः अमात्यो मनोवेदनाकातरं राजानं प्रकृतिस्थं कर्तुं विशेषरूपेण सफलोऽभवत्। विपदि स योग्यसहायकमप्यलभत। सर्वदा प्रभोः हितकारी अमात्यो राज्ञः समदुःखे शरीरे संस्कारादिकं न कृत्वा अहर्निशं तस्य परिचर्यामकरोत्।शोकग्रस्तराज्ञः पार्श्वस्थितिः तस्य सर्वदा सेवा च योग्यामात्यस्य उचितकर्म। स तस्य कार्यमाध्यमेन राज्ञो दुःखे समव्यथितस्य कर्तव्यपरायणस्य च परिचयं ददौ। यौगन्धरायणस्य स्वगतोक्तितः प्रतिभातं भवति यत्, रुमण्वान् राज्ञो निकटात् विरामहीनं गुरुदायित्वं पालयति। विपद्ग्रस्तराज्ञः एकाकी सङ्गी भूत्वा राज्यपरिचालनायां सहायतां करोति। एतेन तस्य आदर्शमानसिकताया राजनीतिविषयकमानसिकतायाश्च परिचयो लभ्यते।

प्रथमाङ्कस्य अन्तिमे काञ्चुकीयस्य उक्तिः-
''खगा वासोपेताः सलिलमवगाढो मुनिजनः
प्रदीप्तोऽग्निर्भाति, प्रविचरति धूमो मुनिवनम्।
परिभ्रष्टो दूराद् रविरपि च संक्षिप्तकिरणो
रथं व्यावृत्यासौ प्रविशति शनैरस्तशिखरम्।।''१/१६ इति।

अत्र दिवाभागस्यावसानत्वात् प्रकृत्याः क्रोडे स्थितमनुष्यस्य मनुष्येतरप्राणिनश्च क्रियाकलापः सूचितः। एतद्विहायापि सायंकालोपस्थितात्प्राक् किं किं कर्म पालयितव्यमित्येतदपि परिस्फुटम्। मुनिजना दिनान्ते स्नानपूर्वकं ध्यानतपस्यादिकर्म सम्पादयन्तीत्येतदपिलक्षितम्।
द्वितीयाङ्के वासवदत्तायाः कथां परिप्रेक्ष्य वत्सराजोदयनस्य प्रसङ्गे पद्मावती अवदत्-
'न खलु एष उज्जयिनीदुर्लभः। सर्वजनमनोऽभिरामं खलु सौभाग्यं नाम।'' इति।
उक्त्यारस्या ज्ञाप्यते यद् वत्सराज उदयनः प्रजानां कल्यानकामनार्थं विपदि आपदि च सर्वदा पार्श्वे तिष्ठति। प्रजाः सर्वदा तासां दुःखकष्टवेदना राज्ञः समीपे वक्तुं पारयन्ति, यस्मात्कारणात् स दुर्लभो नास्ति। एतेन तस्य सुशासकसुलभो मनोभावः प्राप्यते। एतद्विहायापि राजा उदयनो रूपवान् सुदर्शनश्चासीत्। सौन्दर्यं प्रति सर्वे मानवा आकृष्टा भवन्ति रूपेण गृह्यन्ते चा।यथा- सद्य प्रस्फुटितं कुसुमं सदा हास्यमयं शिशुं प्रति मानवा आकृष्टा भवन्ति। एतद्विहाय जगतः सर्वं सौन्दर्यं प्रति मानवा आकृष्टा यत्नशीलाश्च भवन्ति। तथैव पद्मावती अपि राज्ञ उदयनस्य सद्गुणस्य सौन्दर्यस्य च कथां श्रुत्वा तं प्रति अनुरक्ताभवत्। अत्र सौन्दर्यपिपासुत्वस्य परिचयः प्राप्यते। तदनन्तरं वत्सराजोदयनस्य प्रसङ्गे वासवदत्तायाः प्रत्युत्तरेण धात्री अकथयत्- ''आर्ये! आगमप्रधानानि सुलभपर्यवस्थानानि महापुरुषहृदयानि भवन्ति।'' इति। तदन्तरमवदत्- 'न हि न हि। अन्यप्रयोजनेन इहागतस्य अभिजनविज्ञानवयोरूपं दृष्ट्वा स्वयमेव महाराजेन दत्ता।' अत्र अनुमितं भवति यत्, महान्तो जनाः संयतचित्ता ज्ञानिनश्च भवन्तीत्यतो दुःखं तान् क्षणिकस्य कृते व्यथितान् कुर्वदपि समूहविनाशं न साधयति। अतिसहजेनैव द्रुतं च ते तत्परिस्थितितः मोक्षाय सक्षमा भवन्ति। प्रसङ्गेऽस्मिन् वक्तुं शक्यते श्रीमद्भगवद्गीताया द्वितीयाध्यायस्य श्लोकोऽयम्-

''दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते।।''२/५६ इति।

तृतीयाङ्कस्य प्रारम्भे वासवदत्तायाः कण्ठे ध्वनितं भवति- ''धन्या खलु चक्रवाकवधूः याऽन्यविरहिता न जीवति न खल्वहं प्राणान् परित्यजामि आर्यपुत्रं पश्यामीत्येतेन मनोरथेन जीवामि मन्दभागा।''
अत्र मनुष्येतरप्राणिनो विरहव्यथाया मनुष्यसमाजे प्रियजनस्य च विरहव्यथायास्तुलना कृता। चक्रवाकवधूः धन्यारूपेणैव विवेचिता। प्रियजनस्य विच्छेदव्यथायां स प्राणान् त्यजति। किन्तु आशावादी मनुष्यः प्रियजनस्य दर्शनाशया प्राणान् त्यक्तुं समर्था नास्ति। अत्र प्राणिमनोविद्यायाः परिचयः प्राप्यते।

चतुर्थेऽङ्के राजा विदूषकमुद्दिश्य वदति यत्-
''कामेनोज्जयिनीं गते मयि तदा कामप्यवस्थां गते
दृष्ट्वा स्वैरमवन्तिराजतनयां पञ्चेषवः पातिताः।
तैरद्यापि सशल्यमेव हृदयं भूयश्च बिद्धा वयं
पञ्चेषुर्मदनो यदा कथमयं षष्ठः शरः पातितः।।'' ४/१ इति।

वत्सराज उदयनः अत्र कामनया वशीभूतः। पूर्वं सः कामदेवमदनस्य पञ्चबाणैर्बिद्धोऽभवत्। पुनः भाविसमूहविपद आशङ्कासत्त्वेऽपि सः कामनायां बाधाप्राप्तो भवितुं बाध्योऽभवत्। द्वितीयदारपरिग्रहस्तस्य प्रकृष्टनिदर्शनम्। एवम्प्रकारेण परिस्थित्याः कारणेन मानवाः कामनया आकृष्टा भवन्ति।

अनन्तरं रमण्याः सुश्रीसारसश्रेण्या दलं दृष्ट्वा राजा अकथयत्-
''ऋज्वायतां च विरलां च नतोन्नतां च
सप्तर्षिवंशकुटिलां च निवर्तनेषु।
निर्मुच्यमानभुजगोदरनिर्मलस्य
सीमामिवाम्बरतलस्य विभज्यमानाम्।।'' ४/२ इति।

प्रकृत्या अपरूपसुन्दरचित्रवर्णनमाध्यमेन राज्ञः प्रकृतिप्रेम्णो मनोभावः परिस्फुटः। राजोदयनस्य प्रकृत्याश्चित्रदर्शने अभ्यस्तत्वात् तत्समीपे उक्तनिर्मलशान्तचित्रं गोचरीभूतम्।
वत्सराजोदयनस्य निकटे का प्रियतमा पूर्वतनीया देवी वासवदत्ता उत वर्तमानार्या पद्मावती? इत्यस्य प्रश्नस्य उत्तरदाने बाध्यो राजा राजावदत्-

''पद्मावती बहुमता मम यद्यपि रूपशीलमाधुर्यैः।
वासवदत्ताबद्धं न तु तावन्मे मनो हरति।।''४/४ इति।

राज्ञ अस्या उक्त्या माध्यमेन तस्य आदर्शगुवत्तता-वपरायणता-विचक्षणता-दाक्षिणप्रदर्शनकारिपक्षपातशून्यमानसिकतानां परिचयो प्राप्यते। स सर्वाः प्रति योग्यसम्मानं प्रदर्शितवान्।
राजा विदूषकस्य प्रशंसायाः सर्वाः कथा वासवदत्तायै वदिष्यति। तदनन्तरं राज्ञः सम्मितमभवद्यत् वासवदत्ता मृता। तदा राजा विषादेन अवदत्-

''अनेन परिहासेन व्याक्षिप्तं मे मनस्त्वया।
ततो वाणी तयैवेयं पूर्वाभ्यासेन निःसृता।।'' इति।

वत्सराज उदयनः पूर्वाभ्यासवशतः प्रियतमायै मनसः सर्वां कथां वक्तुमैच्छत्। प्रियाविच्छेदेन कोऽपि मानवः तदीयां कथां केषुचिद्दिवसेषु विस्मर्तुं न शक्नोति। पूर्वाभ्यासवशतः अवचेतनमनसि दैनन्दिनकार्यकलापस्य मध्ये तत्कथा मनसि वारं वारमुदितो भवति। एषैव मनसः क्रिया।

तदनन्तरं विदूषकस्य सान्तनादानप्रसङ्गे राजा अवोचत्-
''दुःखं त्यक्तुं बद्धमूलोऽनुरागः स्मृत्वा स्मृत्वा यदि दुःखं नवत्वम्।
यात्रा त्वेषा यद्विमुच्येह वाष्पं प्राप्तानृण्या याति बुद्धिः प्रसादम्।।'' ४/६

अर्थात् सुदृढानुरागत्यागः कष्टकरः। विरहस्य विच्छेदस्य वा व्यथा पुनः पुनः स्मरणेन वर्धते। मानवा मायाजाले आबद्धा भूत्वा मुक्ता भवितुं न शक्नुवन्ति। एवमवस्थायां साधारणमनुष्या अश्रुविसर्जनस्य माध्यमेन ऋणमुक्तये चेष्टन्ते। अवस्थामिमां दृष्ट्वा पार्श्वस्थाः सर्वे मनुष्याः प्रीता भवन्ति।

पद्मावत्या विषये राजा मनसावदत्-
''इयं बाला नवोद्वाहा सत्यं श्रुत्वा व्यथां व्रजेत्।
कामं धीरस्वभावेयं स्त्रीस्वभावस्तु कातरः।।'' ४/८ इति।

सद्य विवाहितपत्न्या निकटे सर्वं सत्यकथनं नोपस्थापनीयम्। नारीजातिः स्वभावत एव अल्पमात्रेणैव कातरा व्यथिता च भवति। एतदेव स्त्रीजात्या मानसिकवैशिष्ट्यस्य स्वरूपम्।

पञ्चमाङ्कस्य प्रारम्भ एव वत्सराज उदयनः स्वमनसावदत्-
''श्लाघ्यमवन्तिनृपतेः सदृशीं तनूजां कालक्रमेण पुनरागतदारभारः।
लावाणके हुतवहेन हताङ्गयष्टिं तां पद्मिनीं हिमहतामिव चिन्तयामि।।'' ५/१ इति।

प्रत्येकं मानवानां जीवनस्य प्रारम्भे प्रेम दृढभावेन मनसि निबद्धं तिष्ठति। चेतसा प्रकृष्टरूपेण स्निह्यति चेत् मनसो तद्विस्मरणमत्यन्तं कष्टकरम्। वियोगो विच्छेदो वा भवति चेदपि स समयक्षेत्रे पीडां जनयति। एष एव मानसिकवैशिष्ट्यस्य एको दृष्टान्तः। समुद्रगृहप्रवेशस्य समये सर्पः कुण्डल्याकारेणास्ति विदूषकस्य एवम्विधकथां परिप्रेक्ष्य राजावदत्-

''ऋज्वायतां हि मुखतोरणलोलमालां
भ्रष्टां क्षितौ त्वमवच्छसि मूर्ख! सर्पम्।
मन्दानिलेन निशि या परिवर्तमाना
किञ्चित् करोति भुजगस्य विचेष्टितानि।।''५/३ इति।

सर्पो दृश्यते चेत् प्रत्येकं मनुष्य एव शशव्यस्तो भवति।विषहीनो विषयुक्तो वा भवतु, मनुष्यः सहसा पश्यति चेद्भीतो भवति। तस्मात्कारणात् रज्जुर्माला वा सर्पवत् पतन्ती तिष्ठती वा पूर्वज्ञानवशात् सहसा दृश्यते चेत् प्रत्येकं मनुष्यो भीतो भवति। शास्त्रे रज्जौ सर्पभ्रमस्य दृष्टान्तो विद्यते। एतन्मानसिकवैशिष्ट्यस्य एकमुदाहरणम्।
पद्मावत्याः समुद्रगृहं प्रति अनागमस्य कारणप्रसङ्गे राजा अवदत्-

''शय्या नावनता तथास्तृतसमा न व्याकुलप्रच्छदा
न क्लिष्टं हि शिरोपधानममलं शीर्षाभिघातौषधैः।
रोगे दृष्टिविलोभनं जनयितुं शोभा न काचित्कृता
प्राणी प्राप्य रुजा पुनर्न शयनं शीघ्रं स्वयं मुञ्चति।। ५/४ इति।

कोऽपि जनः शय्यां गृह्णीयाच्चेत् तस्यावरणं कुञ्चितं भवति। शिरःपीडया दग्धो भवति चेत् औषधेन मस्तकस्य उपाधानं क्लिश्यते। एतद्विहाय रोगग्रस्तो जनः सकृत् शय्यां गृह्णीयात् चेत् स्वयं शीघ्रं शय्यां न त्यजति। उक्तविषया मानसिकभावेन उपलब्धव्याः। एतद् बुद्धिमन्मनुष्याणां सचेतनमानसिकताया दृष्टान्तः।
वासवदत्ता जीवितास्तीति कथाप्रसङ्गे राजा अवोचत्-

''यदि तावदयं स्वप्नो धन्यमप्रतिबोधनम्।
अथायं विभ्रमो वा स्याद् विभ्रमो ह्यस्तु मे चिरम्।।'' इति।

प्रियजनस्य विरहव्यथासहनमत्यन्तं कष्टकरम्। सहसा कस्मिंश्चिद्दिवसे तन्द्रावस्थायां प्रियजनस्य स्पर्शेन हतचकित उत्कण्ठितश्चाभवद् इत्येषावस्था पूर्वस्य स्मृतितः स्नेहवशतश्च कदापि विस्मर्तुं न शक्यतेइति स्वाभाविकमेव। एष स्नेहपूर्णवेदनाहतमनसः प्रकाशः।
विदूषक उक्तवान् अन्या काचित् अवन्तीसुन्दरीनामिकया यक्षिण्या सह राज्ञः साक्षात्कारोऽभवत्। अस्य प्रत्युत्तरेण राजा अवोचत्-

''स्वप्नस्यान्ते विरुद्धेन नेत्रविप्रोषिताञ्जनम्।
चारित्र्यमपि रक्षन्त्या दृष्टं दीर्घालकं मुखम्।।'' ५/१० इति।
अपि च
''योऽयं सन्त्रस्तया देव्या तया बाहुर्निपीडितः।
स्वप्नेऽप्युत्पन्नसंस्पर्शो रोमहर्षं न मुञ्चति।।'' इति।

निजप्रियतमया सह बहुसमयातिवाहनाद् अङ्गसौन्दर्यस्य निरीक्षणाच्च तद्विरहव्यथानुभूता भवति चेदपि मनसि सुस्पष्टं तच्चित्रं विद्यमानंभवत्येव। सकृद्दृश्यते चेदपि पूर्वस्य स्मृत्या सह हृदि स्थितप्रतिच्छव्या मेलबन्धनं सम्भवति। तस्मात् प्रत्येकं मनुष्यः प्रियजनस्य विरहव्यथां सोढुं शक्नुवन्त्यपि क्षणिकस्य दर्शनेन चमकितो भवति तां सम्प्रज्ञातुं च समर्थो भवति। तद्विहाय पूर्वं प्रियजनेन सह अङ्गाङ्गिभावेन युक्तत्वात् तत्स्पर्शस्य अनुभूतिः मनसि दृढभावेन निबद्धा तिष्ठति। परवर्तिकाले दीर्घसमयव्यवधानेनापि तत्परिचितानुभूत्याः पुनरावृत्तिर्भवति चेत् मनुष्यः पुनः पूर्वस्मृतिं लभते।
युद्धं निमित्तीकृत्य सुकौशलमलम्ब्य राजा आश्वस्तीकृतः।युद्धस्य प्रयोजने यानि तावत् मानसिकज्ञानस्य प्रयोजनानि, उदयनस्य अमात्यवर्गेषु पुर्णमात्रया तानि विराजितानि। अमात्याः समीचीननीतिं प्रयुज्य उपयुक्तसमये शत्रुपक्षमाक्रमितुं राजानमनुरुद्धवान्। एष कौशलि नीतिप्रयोगनिपुणमानसिकातायाः परिचयः। एतद्विहाय अमात्यादिषु युद्धविषयकमनोविद्याया ज्ञानं पूर्णमात्रया विद्यमानं भवति।
एवम्विधसमये राजा गात्रोत्थानं कृत्वावदत्-

''उपेत्य नागेन्द्रतरङ्गकीर्णे तमारुणिं दारुणकर्मदक्षम्।
विकीर्णबाणोग्रतरङ्गभङ्गे महार्णवाभे युधि नाशयामि।।''५/१३ इति।

राज्ञः क्षत्रियजनोचिता तेजोमूर्तिर्विद्यते। स राजधर्मपरिपालनाय बद्धपरिकरोऽभवत्। एतेन राज्ञो राज्यजयाय यन्मानसिकज्ञानस्य प्रयोजनं तत्परिलक्षितं भवति।
नर्मदाननदीतीरे प्राप्ताया घोषवतीवीणाया उपराजसम् आनयनानन्तरमङ्के स्वीकृत्य राजा मूर्छितोऽभवत्। तदन्तरं स घोषवतीवीणामुद्दिश्यावदत्-

''श्रुतिसुखनिनदे कथं नु देव्याः स्तनयुगले जघनस्थले च सुप्ता।
विहगगनराजोविकीर्णदन्ता प्रतिभयमध्युमितास्यरण्यवासम्।।'' ६/१ इति।

ततो राजा घोषवतीवीणाप्रसङ्गे अवदत्-

''चिरप्रसुप्तः कामो मे वीणया प्रतिबोधितः।
तां तु देवीं न पश्यामि यस्या घोषवती प्रिया।।'' ६/३ इति।

प्रियतमायाः प्रियवस्तु लभ्यते चेत् किञ्चित् तृप्तिर्लभ्यते। प्रियतमाया विच्छेदे सत्यपि तस्याः प्रियवस्तु सयत्नं रक्ष्यते। मानवः साधारणतः प्रियजनस्य अन्तिमस्मृतिमाकृष्य जीवितुमिच्छति। मायाजालेन आच्छन्नो मनुष्यः प्रियजनस्य अन्तिमां स्मृतिमक्षुण्णतया स्थापयितुं चेष्टते। अत्र मायामयमानसिकताया बहिःप्रकाशो भवति। महासेननिकटादागतः काञ्चुकीयः वासवादत्ताधात्री वसुन्धरा च वत्सराजोदयनस्य द्वारदेशे उपस्थितौ। तदा राजा पद्मावतीं निकटे उपवेष्टुमनुरुद्धवान्-

''किं वक्ष्यतीति हृदयं परिशङ्कितं मे
कन्या मयाप्यपहृता न च रक्षिता सा।
भाग्यैश्चलैर्महदवाप्तगुणोपघातः
पुत्रः पितुर्जनितरोष इवास्मि भीतः।।'' ६/४ इति।

वत्सराज उदयनोऽत्र भाग्यस्य परिहासजनितव्यर्थताकारणात् स्वमुद्दिश्यैव क्षेदं प्रकाशितवान्। पूर्वकृतापराधात् स व्यथितः। चञ्चलभाग्यात् वियुक्तसन्तानयोः पित्रोः निकटे सान्त्वनावाक्यं यथायथं नास्ति। तथैव गुरुजनस्य निकटे राजा पितुः क्रोधोत्पादकपुत्र इव भीतोऽभवत्। एतदेव तस्य नतमस्तकतायाः श्रद्धाशीलतायाश्च परिचयं वहति।

काञ्चुकीयः उपराजसमुपस्थित्य अवादीत्-
''सम्बन्धिराज्यमिदमेत्य महान् प्रहर्षः
स्मृत्वा पुनर्नृपसुतानिधनं विषादः।
किं नाम दैव! भवता न कृतं यदि स्याद्
राज्यं परैरपहृतं कुशलं च देव्याः।।'' ६/५ इति।

कुटुम्बस्य गृहं प्रथममागत्य ते प्रीता अभवन्। किन्तु परक्षण एव राजतनयायाः कथां स्मृत्वा तेषां चित्तं विषादपूर्णमभवत्। सन्तानस्नेहस्यातीव दृढत्वात् जगतः समस्तवस्तुनो विनिमयेन प्रत्येकं मनुष्यः सन्तानं प्रतिलब्धुमिच्छति। इह जगतः सर्व एव मनुष्याः प्राणिनश्च सर्वसम्पदो विनिमयेन द्रव्यस्य विनिमयेन च निजसन्तानस्य विलुप्तिं कदापि नेच्छति। एतदेव मानसिकप्रवृत्त्या एकं विशेषवैशिष्ट्यम्।
महासेनमहिष्याः कुशलप्रसङ्गे राजोदयनस्य अतिशयदुःखप्रकाशानन्तरं काञ्चुकीय उक्तवान्-

''कः कं शक्तो रक्षितुंमृत्युकाले रज्जुच्छेदे के घटं धारयन्ति?
एवं लोकस्तुल्यधर्मो वनानां काले काले छिद्यते रुह्यते च।।'' ६/१० इति।

उक्तेरस्या ज्ञाप्यते यदवसम्भावि तत्कोऽपि लङ्घयितुं न शक्नोति। जगतो यत्किमपि सृष्टं तद्विधेर्नियमानुसारेण कालस्य व्यवधानेन चावश्यमेव ध्वंसेत। मायाया वशवर्तिनो भूत्वा वयं स्वल्पमतिसम्पन्ना मानवाः शोकग्रस्ता भवामः। ये तावत् परिस्थित्यामस्यां स्थिरास्तिष्ठन्ति, ते प्रकृता धीरा ज्ञानिनो वेत्याख्यया विवेचिताः। एवं धीरमनस्विनो मानवा अत्यन्तमावश्यकाः।

गच्छितवस्तुनः प्रत्यर्पणविषये राजोदयनः अब्रवीत्-''निर्यातय पद्मावति! साक्षिम न्न्यासो निर्यातयितव्यः। इह अत्र भवान् रैभ्यः अत्रभवती चाधिकरणं भविष्यतः।''

अत्रानुमीयते यत्, गच्छितवस्तुनो रक्षणमत्यन्तं कष्टकरम्। परं तद् योग्यजनाय प्रत्यर्प्यते चेत् अन्यं कञ्चित् साक्षिरूपेण स्थापयित्वा कर्तव्यम्। भविष्यति समस्यायाः सम्मुखीनो यथा न भवेत् तदर्थं साक्षिणः सम्मुखे प्रत्यार्पणीयमेव श्रेयः। यौगन्धरायणं वासवदत्तां च सम्मुखे दृष्ट्वा राजोदयनः अवादीत्-

''किं नु सत्यमिदं स्वप्नः सा भूयो दृश्यते मया।
अनयाप्येवमेवाहं दृष्टया वञ्चितस्तदा।।'' ६/१७ इति।

कस्यापि कथां वारं वारं स्मर्यते चेदवचेतनमनसि तच्चित्रं प्रस्फुटितं भवति मानसचक्षुषा। इन्द्रियस्य साहाय्यं विना मानवचक्षुषा अन्यस्य मानसिकावस्था ज्ञातुं शक्यते। मनोविज्ञानस्य भाषया एतद्दूरवेक्षणं 'Telepathy'वोच्यते। विषयोऽयं परामनोविद्यायामन्तर्गतः।

यौगन्धरायणो राज्ञश्चरणयोः पतित्वा क्षमां प्रार्थयामास। राजा तमुत्थाप्य अवदत्-

''मिथ्योन्मादैश्च युद्धैश्च शास्त्रदृष्टैश्च मन्त्रितैः।
भवद्यत्नैः खलु वयं मज्जमानाः समुद्धृताः।।'' ६/१८ इति।

यौगन्धरायणः कश्चित् सुदक्षो राजनीतिविद्। राजनीत्याः सफलं कौशलमवलम्ब्य स हृतराज्यस्य पुनरुद्धाराय सफलोऽभवत्। राजा उदयनः तं प्रशंसितवान् कृतज्ञतां च प्रदर्शितवान्। अत्र वत्सराजोदयन-मन्त्रियौगन्धराणयोर्मध्ये राजनीतिविषयकमनोविद्याया ज्ञानं स्पष्टरूपेण विद्यमानम्।

### स्वप्नवासवदत्तरूपके नायकस्य वत्सराजस्य मनोवृत्तिविवेचनम्

संस्कृतनाट्यतत्त्वविद्भिः प्रदत्तनाटकस्य नायकलक्षणसमूहो विचार्यते चेद् वत्सराज उदयनो निःसन्देहं नायकपदवाच्यो भवति। स न केवलं प्रख्यातवंशजातः, स यथा प्रतापवान् तथा धीरोदात्तनायकश्रेण्या अन्तर्गतः। समुन्नतचरित्रवत्सराज उदयनो राज्यस्य प्रजागणैः सततं समादृतः सम्मानितश्च भवति स्म। उदयनो वत्सराज्यस्य राजा, तस्य राजधानी कौशाम्बी। मगधराज्यस्याश्रमागतब्रह्मचारिणो मुखाज्ज्ञायते यत्, वत्सराजस्य लावाणकपरित्यागानन्तरम्- ''ततो निष्क्रान्ते राजनि प्रोषितनक्षत्रचन्द्रमिव नभोऽरमणीयः संवृत्तः स ग्रामः।''- उक्तेरस्या अनुमीयते यद् राजा उदयनः अत्यन्तं जनप्रियः कल्याणकामी प्रजावत्सलश्च राजासीत्।

नाटकस्य चतुर्थाङ्के तस्य प्रथमाविर्भावोऽभवत् प्रेमिकरूपेण। आदर्शप्रणयिनः सर्वगुणैरेव स मण्डित आसीत्। तस्य चरित्रं महिमान्वितो वासवदत्तां प्रति निविडप्रगाढानुरागेण। महासेनकन्या वासवदत्ता वत्सराजोदयनस्य न केवलं प्रियतमा महिषी आसीत्, स आसीत्- ''गृहिणी सचिवं सखीमिथः प्रियशिष्या ललिते कलाविधौ।'' इति(रघुवंशम् ८/६१)। मृगयातः प्रत्यावर्त्य प्रियतमापत्न्या मृत्युसंवादं प्राप्य, स स्वयमेव अग्नौ प्राणान् विसर्जयितुमुद्युक्तोऽभवत्। राजा भूत्वापि वासवदत्तायाः शोकेन विह्वलो भूत्वा साधारणमनुष्यवद् भूलुण्ठितो भूत्वा अश्रु अमुञ्चत। ब्रह्मचारी राज्ञो विवरणप्रदानकाले अवदत्- चक्रवाका अपि तद्वद् विरहकातरा न भवन्ति अथवा विशिष्टपत्न्या वियोगेन अपरः कोऽपि एवं शोकविह्वलो न दृश्यते इति। पतिप्रेमवशाद् वासवदत्ता दग्धा भूत्वापि अदग्धवत्प्रतीताऽभवत्।

मगधराजदर्शकस्य भगिनीं पद्मावतीं यद्यपि परिणीतवान् इति सत्यम्, किन्तु तत्केवलं राजनैतिकोद्देश्यसिद्धये। वत्सराजोदयनस्य कार्यान्तरनिमित्ताय मगधराजप्रासादगमनानन्तरं तदीयमुच्चवंशं ज्ञानं वयो रूपं च विचार्य मगधराजः स्वभगिनीं राज्ञे सम्प्रादत्। तत्सत्त्वेऽपि वासवदत्तां प्रति तदीयः प्रणयः पूर्ववदेव गभीरो निविडश्चासीत्। वयस्यवसन्तकस्य प्रश्नस्योत्तरेण राजोदयनः अब्रवीत्-

''पद्मावती बहुमता मम यद्यपि रूपशीलमाधुर्य्यैः।
वासवदत्ताबद्धं न तु तावन्मे मनो हरति।।'' ४/४ इति।

नाटके उदयनचरित्रस्य अपरेषां नैकगुणानां कथामेव श्रुतवन्तः, किन्तु तदीया प्रेमिकसत्तैव प्रधानतां गता। नाटकस्य युद्धादिकं नेपथ्ये एव सङ्घटितम्। तत्सत्त्वेऽपि वक्तुमर्हति यत्, युद्धस्याह्वानेन वीरवदेव स प्रत्यागृणत। पञ्चमाङ्कस्यान्तिमे स्वप्ने दृष्टवासवदत्तायाः स्मृतौ मुह्यमानः स्थित्वापि स युद्धाय दृढसंकल्पोऽभवत्। आरुणिं प्रति तदुक्तिः- 'तमारुणिं दारुणकर्मदक्षं महार्णवाभे युधि नाशयामि।' इति।

उदयनस्य चरित्रं शालीनतामण्डितम्। महासेनस्य निकटे स यमपराधं कृतवान् तदर्थं सः अनुतप्तः। षष्ठेऽङ्के धात्रीवसुन्धरायाः काञ्चुकीयस्य प्रतिवाक्यालापे वासवदत्तायाः पितरौ प्रति काचिद् गभीरा श्रद्धा व्यक्ताभवत्। उदयन आदर्शप्रेमिकः। पञ्चमाङ्के स्वप्नस्य मध्ये स विरचिकायाः प्रसङ्गमुत्थापितवान्। तन्न भवति चेदस्माकमवगमनस्य कोऽप्यवकाश एव नाभविष्यत्। विरचिकायाः कारणात् स वासवदत्ताया निकटे क्षमाप्रार्थी। वत्सराजोदयनो धीरोदात्तश्रेण्या नायकः, प्रजाप्रियहृदयेन मनसो विचित्रगुणेन च मण्डितः। राज्यपरिचालनायाः क्षेत्रे पारिवारिकजीवने सर्वैः सह सदाचारणस्य क्षेत्रे च तन्मध्ये रीजनीतिविषयिण्या लोकविषयकमनोविद्यायाश्च ज्ञानं पूर्णमात्रया विद्यमानम्। एतद्विहाय नैकक्षेत्रे तन्मध्ये प्राणिमनोविद्याया लोकमनोविद्यायाः परामनोविद्याया वृत्तिमूलकमनोविद्यायाश्च परिचयो लक्ष्यते। मनोविद्यायाः सम्यग् ज्ञानं प्रत्यक्षेण परोक्षेण वा प्रयुज्य स व्यक्तिगतजीवनस्य, सामाजिकजीवनस्य, राष्ट्रपरिचालनायाः क्षेत्रे, सामरिकक्षेत्रस्य वा विभिन्नसमस्यायाः समाधानं कृतवान्।

### स्वप्नवासवदत्तरूपके वासवदत्ताया मनोवृत्तिवेवचनम्

वासवदत्ता न केवलमुदयनस्य प्रियतमा महिषी आसीत्। चरित्रेऽस्मिन् भारतीयनारीत्वस्य बहुविचित्रगुणस्य समावेशो जातः। पतिप्रेम्णः कृते राज्यस्य कल्याणाय च सा जीवनस्य समस्तसुखेभ्यः आत्मानमन्तराले अस्थापयत् स्वेच्छया विरहं च गृहीतवती। स्वप्ननाटकस्य नायिका वासवदत्ता एका अपरिसीमस्नेहत्वेन पूर्णा कारुण्यस्य प्रतिमूर्तिः। दुर्लभात्मत्यागाय सा सकलदर्शकहृदयमाकर्षितवती। सा देहस्य माधुर्य्येण सुन्दरी अन्तरस्य ऐश्वर्येण च सुन्दरतमा। पद्मावती स्वामिने समर्प्य सा तस्य विरुद्धे विन्दुमात्रमीर्ष्यां न कृतवती। धैर्यस्य क्षमायाश्च सा मूर्तविग्रहरूपिणी। पत्ये स सर्वस्वं त्यक्तुं प्रस्तुतः। निर्जने तस्या अश्रुविसर्जनं दर्शकास्तद्दृष्ट्वा तां प्रति समवेदनां व्यक्तीकृतवन्तः। वासवदत्तायाः प्रेम त्यागस्य भित्त्या प्रतिष्ठितम्।

स्वप्ननाटकस्य नायिका वासवदत्ता आदर्शप्रेमिका। नाटके सा मातृत्वस्य अधिकारिणीरूपेण न प्रदर्शिता। तत्सत्त्वेऽपि वयमनुभवामो यद् वासवदत्तायाः प्रेम मातृत्वभावमण्डितम्। अनुगतान् सर्वान् प्रति सा मातृस्वरूपा। पञ्चमाङ्कस्य स्वप्नदृश्ये सा आगमनकाले निद्रितोदयनस्य हस्तं शय्यायां यथायथभावेन विन्यस्य आगतवतीति दृश्यमपूर्वम्। माता यथा सन्तानं सयत्नं शाययित्वा आगच्छति तथैवैतत्। वासवदत्तायाश्चरित्रमध्ये स्थाने स्थाने वयं मनोविद्यायाः परिचयं प्राप्णुमः। यौगन्धरायणेन सह मन्त्रणात आरभ्य पत्युः कृते राज्यस्य कृते वा आत्मनः सर्वस्वत्यागेन, पद्मावत्या निकटे स्थित्वा च समस्तविषयाभिरक्षणार्थस्य क्षेत्रे तन्मध्ये मनोविद्याया विभिन्नज्ञानं सुस्पष्टं व्यक्तीभवति।

### स्वप्नवासवदत्तरूपके यौगन्धरायणस्य मनोवृत्तिविवेचनम्-

स्वप्नवासवदत्तम् इति नाटकस्य प्रथमेऽन्तिमे चाङ्के यौगन्धरायणस्यछद्मवेशेन आविर्भावो भवति। समस्तनाटकीयघटनायाः केन्द्रविन्दौ अस्ति उदयनस्य मन्त्री यौगन्धरायणः। नेपथ्ये स्थित्वापि स दर्शकस्य मनो व्याप्य वर्तमानः। राजनैतिकपरिकल्पनाया एवं सुनिपुणनिर्माणशक्तिः सुलभा नास्ति। स प्रखरराजनैतिकज्ञानसम्पन्नः, कूटनीतिविद् विचक्षणश्च मन्त्री। स प्रभुभक्तः राजानुगतः दृढप्रतिज्ञः धैर्यवान् राज्ञ उदयनस्य परमहितैषी च। मन्त्रियौगन्धरायणः स्वसुखस्वाच्छन्द्यभोगविलासादिसर्वमम्लानवदनेन विसर्ज्य सततं प्रभोः इष्टचिन्तायां व्यापृतः। मन्यते यत्, राज्यस्य शासनयन्त्रस्य परिचालकः स एव, उदयनो नाममात्रेण राजा। शत्रुणारुणिना कौशाम्बीराज्याधिकारानन्तरं प्रभोः हृतराज्यस्य पुनरुद्धाराय परिकल्पनां स्थिरीकृत्य वासवदत्तामात्मत्यागाय उद्बुद्धां कृतवान्।

स्वप्नवासवदत्तनाटके यौगन्धरायणो राजनैतिकोद्देश्यस्य चरितार्थाय लावाणकस्य आग्निदाहे आत्मनो वासवदत्तायाश्च मृत्युकाहिनीं प्रचारितवान्। वासवदत्तां भगिनीपरिचयेन पद्मावत्या निकटे न्यस्तवान्, उद्देश्यसफलताया दिनं यावत् प्रतीक्षमाणाया वासवदत्तायाश्चरित्रसम्पर्के येन कोऽपि प्रश्नो न भवेत्। तदनन्तरं मगधराजदर्शकस्य भगिनीपद्मावत्या सह विवाहः सम्पादितः। अतःपरं मगधस्य राजशक्तिम् उदयनस्य शत्रावारुणेः विरुद्धे प्रयोगाय कापि बाधा नावर्तत। मगधराजस्य सक्रियं साहाय्यं लब्ध्वा वत्सराज उदयनो निजराज्यं पुनरुद्धारितवान्। नाटकस्य प्रथमाद् अन्तिमं यावत् सर्वा घट्टना यौगन्धरायणस्य गोपनपरिकल्पनामनुसृत्य संघटिताः। प्रभोः कल्याणाय यौगन्धरायणः सकलप्रकारकात्मसुखभोगानां स्वेच्छया विसर्जनं दत्तवान्। नैकदुःखकष्टे स्वागतीकृत्य दुःसाहसिककर्मसु प्रवृत्ताय द्विधाबोधं न कृतवान्। क्षमताया अधिकारी भूत्वापि प्रभोः उदयनस्य सर्वदा सम्मानं श्रद्धामिश्रितं भयं च करोति स्म।

राजभक्तवीरयौगन्धरायणस्य परिकल्पनासफलानन्तरं स प्रभोर्निकटे आत्मप्रकाशं कृतवान्। निजापराधाय राज्ञः पदतले क्षमां प्रार्थयामास। राजा उदयनोऽपि यौगन्धरायणस्य सर्वकार्याणां यथायथं मूल्यायनं कृत्वावदत्, तस्य चेष्टयैव वारं वारं विपत्सागरे निमज्जिता भूत्वापि ते संरक्षिताः।राजावदत्-

''मिथ्योन्मादैश्च युद्धैश्च शास्त्रदृष्टेश्च मन्त्रितैः।
भवद्यत्नैः खलु वयं मज्जमानाः समुद्धृताः॥'' इति।

स्वप्नवासवदत्तनाटके वत्सराजोदयनस्य मन्त्रिणो यौगन्धरायणस्य मध्ये मनोविद्याया नैकचित्राणि प्रस्फुटितानि। तस्य प्रत्येकं निपुणकर्ममध्ये प्रतिच्छत्रं मनोविद्यायाश्चिह्नं सुस्पष्टम्। स एकतो यथा सुदक्षो राजनीतिवित् तथैव राष्ट्रपरिचालनायाः क्षेत्रे निजयोग्यतां प्रदर्शितवान्। स राजनीतिक्षेत्रे सामरिकक्षेत्रे राष्ट्रपरिचालनायाः क्षेत्रे व्यक्तिगते च क्षेत्रे मनोविद्याया ज्ञानस्य परिचयं प्रादात्।

**पद्मावत्या मनोवृत्तिविवेचनम्**

स्वप्नवासवदत्तम् इति नाटके नायकवत्सराजोदयनस्य द्वितीया महिषी पद्मावती। स मगधराजपुत्री, राज्ञो दर्शकस्य भगिनी परमा रूपवती गुणवती च। विदूषकवसन्तकस्य मतेन पद्मावती तरुणी, दर्शनयोग्या, अकोपना, निरहङ्कारा, मधुरभाषिणी दाक्षिण्यवती च। उदारहृदया धर्मप्राणा दानशीला पद्मावती तपोवनस्य राजमातारं द्रष्टुमागत्य तापसेभ्यः यथाभिलषितं तपःसाधनस्य उपकरणसमूहं प्रदत्तवान्। धर्मप्रिया राजकन्या तपस्विगणस्य धर्माचरणे बाधां स्रष्टुं नेच्छति। एतदेव तस्या कुलव्रतम्।

विवाहानन्तरमपि स्वामी वासवदत्तां विस्मर्तुमसमर्थः इत्येतज्ज्ञात्वापि वासवदत्तां प्रति ईर्षान्विता नाभवत्। एवञ्च राजा उदयनो विदूषकमवदत्- 'वासवदत्ताबद्धं न तु तावन्मे मनो हरति।' इति। एतच्छ्रुत्वापि पद्मावती अविचला भूत्वाब्रवीत्- आर्यपुत्रस्य हृदयमनुकम्पापूर्णम्। अधुनापि स वासवदत्तां विस्मर्तुं शक्तो न भवति।

अपरदृष्टिभङ्ग्या पद्मावत्याश्चरित्रं दर्शकानां हृदये श्रद्धाया आसनमधिकरोति। उदयनस्य हस्ते वासवदत्तायाश्चित्रागमनान्तरं पद्मावती अकथयत्- चित्रगतं गुरुजनं दृष्ट्वा अभिवादयितुमिच्छामि। पुनः यदा पद्मावती ज्ञातवती, आवन्तिका प्रकृतपक्षे वासवदत्ता, तदा सावदत्- एतानि दिनानि व्याप्य सखीवदाचरितम्, भवती गुरुस्थानीया, प्रमादः कृतश्चेत् क्षमतां माम्। चरित्रमहिम्ना पद्मावती आदितोऽन्तं यावद् दर्शकानां मनः अधिकृतवती।

पद्मावत्या जीवनस्य नैकक्षेत्रे मनोविज्ञानस्य लक्षणं स्पष्टं प्रतीयते। विभिन्नपरिस्थितिषु प्रत्यक्षतया परोक्षतया वा मनोविद्याया ज्ञानं प्रयुज्य समग्रसमस्यानां समाधामकरोत्। व्यक्तिगतजीवने पारिवारिकजीवने वा मनोविद्यायाः प्रयोगो लक्षितः। तन्मनोवृत्त्या नैकक्रियाकलापाभिर्वा अस्माभिः तदीयमनोविज्ञानस्य प्रयोगो दृश्यते।

**स्वप्नवासवदत्तरूपके विदूषकस्य मनोवृत्तिविवेचनम्**

संस्कृतनाटके विदूषको भवति राज्ञः सर्वक्षणानां कृते विश्वस्तो नर्मसहचरः। अङ्गवैकल्याद्भुतकार्यविचित्राहार्यविस्मयकरवाग्वैदग्ध्यादिभिः सहृदयसामाजिकानां हास्योद्रेक एव तदीयं प्रधानं कार्यम्। एतद्विहाय नायकराज्ञे प्रणयव्यापारे यथोचितं सहयताप्रदानं तदीयं कर्तव्यकर्मणि अन्तर्भुक्तम्। स एकतो यथा भोजनविलासी अपरतश्च कलहप्रियः। स्वप्नवासवदत्तनाटकस्य विदूषको वसन्तकः उक्तगुणाधिकारी। नायकवत्सराजस्य नियतसहचररूपेण सक्रियभूमिका पालितस्तेन।

नाटके वासवदत्ताशोकेन अत्यधिककातरविह्वलराजोदयनाय नित्यसहचररूपेण यथोचितसान्त्वनां प्रदाय मनःकष्टलघुतामसाधयत्।राजोदयनस्य वयस्यवसन्तकेन सह वार्तालापकाले विदूषकेण वासवदत्ता मृतेति कथनान्तरं राजनयनमश्रुसिक्तमभवत्। राज्ञो मुखप्रक्षालनस्य जलानयनकाले पद्मावत्या सह साक्षात्कारोऽभवत्। पद्मावत्या हेतौ पृष्टे वायुना काशकुसुमरेणूनां महाराजनयनयुगलपतनान्तरं तदीयनयनयुगलमश्रुपूर्णमित्यवादीद् विदूषकः। पुनः राज्ञ उदयनस्य विषदाक्रान्तदशायां पद्मावती तत्पार्श्वे उपस्थिता भवतीति दृष्ट्वा राज्ञस्त्राणार्थं मगधराजस्य राजसभां राजानं नीत्वा अतिथिभिः सह राज्ञः साक्षात्कारं कारितवान्। एवम्प्रकारेण राज्ञः सक्रियं साहाय्यमकरोत् राजवयस्यो वसन्तकः। स समयक्षेत्रे राज्ञो मनोदशां निर्णयित्वा वाक्पटुताया माध्यमेन राज्ञो मनः अरञ्जयत्। स्वबुद्धिमत्ताया माध्यमेन विभिन्नपरिस्थित्यां सर्वेषां मनोऽवगम्य राजानं स्वाभाविकीचकार। एतेन स्वप्नवासवदत्तम् इति नाटकस्य विदूषकचरित्रमध्ये मनोवृत्तिज्ञानस्य नैकदिशः प्रस्फुटिताः।

**उपसंहृतिः**

परिशेषे वक्तुं शक्यते यत् नाटकादिदृश्यकाव्यैर्यथा सहृदयानां मनोरञ्जनं जायते तथैव रामादिवत् प्रवृत्तेः तथा रावणादिवत् प्रवृत्तेश्च किं फलं भवितुमर्हतीत्यादिविषये शिक्षामपि ते सहृदयाः लभन्ते। ननु ज्ञानमेतत्तु व्यवहारादेव ज्ञायते, तत् कृते नाटकदर्शनस्य प्रयोजनं न स्यात्, अपि तु आनन्दविधानमेव नाटकदर्शनस्य प्रयोजनमिति चेत्तत्रोच्यते तन्न। तत्र रामादिवत्प्रवृत्तेः रावणादिवत्प्रवृत्तेश्च पूर्वमेव वयं जानीमो यत् पश्चात् किं फलं भविष्यतीति। वस्तुतस्तु वयं सर्वे स्वल्पकालाधीनाः स्वल्पायुष्मन्तो वा। मदीये स्वल्पकालविशिष्टे जीवने तु रामस्य रावणस्य कस्यापि एकस्य विषये एव प्रवृत्तिः भवितुमर्हति। जीवनस्यान्तिमकाले यदि प्रवृत्तिचयनविषये कापि अनुशोचना स्यात् तर्हि संशोधनस्यावकाशो न भवति। अतः प्रवृत्तेः प्रागेव यदि फलविषये ज्ञानं भवेत् तर्हि जीवनस्य सार्थक्यानर्थक्यविषये काप्यनुशोचना न भवेत्। अतः नाटकस्य व्यवहारज्ञानम् अपरमेकं प्रयोजनम्। तथा च ज्येष्ठजनानामुपदेशादिकारणात् व्यवहारज्ञानरूपफललाभोऽपि नाटकस्यैव माहात्म्यं ख्यापितं तस्य दृश्यश्रव्योभयात्मकत्वात्। काव्येषु नाटकं रम्यमिति न्यायेन नाटकादेव व्यवहारज्ञानम् अनायासलभ्यम्। व्यवहारज्ञानञ्च मनोवृत्तिलभ्यं भवति।उदयनाश्रित्य काव्यानि प्रायेण दृश्यकाव्यानि। तत्र व्यवहारज्ञानमपि मनोवृत्तिनिर्भरं भवति। अतः अस्मिन् स्वप्नवासवदत्तनाटके पदं पदं मनोवृत्तेः प्रकाशो परिलक्ष्यते इति शम्।

**सहायकग्रन्थसूची**


1. माधव-केशव-काटदरे, वत्सराज उदयन, मुम्बाई: नवभारत प्रकाशन।
2. ड. वीरेन्द्रनाथ-त्रिवारी, उदयनकथा, दिल्ली:, शिवालिक प्रकाशन।
3. पण्डित-वैद्यनाथ-झा, प्रतिज्ञायौगन्धरायणम्, वाराणसी: चौखम्बा संस्कृत सिरीज आफिस, १९८१ (प्रथमसंस्करणम्)।
4. कृष्णकुमारः, उदयनचरितम्, १९८१ ।
5. भासः, स्वप्नवासवदत्तम्, व्याख्याकारः- बालगोविन्द-झा, वाराणसी: चौखम्बा कृष्णदास अकादेमी, २०११ (विंशतिसंस्करणम्)।
6. प्रियदर्शिका, सम्पा. रामनाथ-त्रिपाठी शास्त्री, वाराणसी: चौखम्बा संस्कृत सिरीज आफिस, १९७८ (प्रथमसंस्करणम्)।
7. रत्नावली, सम्पा. बालगोविन्द-झा, वाराणसी: कृष्णदास अकादेमी, २०१६ (विंशसंस्करणम्)।
8. मम्मटः, काव्यप्रकाशः, सम्पा. गजाननशास्त्रीमुसलगांवकरः, वाराणसी: कृष्णदास अकादेमी, १९७७ (प्रथमसंस्करणम्)।
9. विश्वनाथकविराजः, साहित्यदर्पणः, सम्पा. कृष्णमोहनशास्त्री, वनारसीः चौखम्बा संस्कृत सीरीज आफिस, १९५५ (द्वितीयसंस्करणम्)।
10. अध्यापक-समरेशचन्द्र-भट्टाचार्य, मनोविद्या, कलिकाता: वुक्स इण्डिकेट् प्राइभेट् लिमिटेड्, २००१ (द्वितीयसंस्करणम्)।
11. परेशनाथभट्टाचार्य, मनोविद्या, कलिकाता: मुखार्जी एण्ड कोम्पानी प्राइभेट् लिमिटेड्, १३७० (प्रथमसंस्करणम्)।